संस्कृतवार्ता:

दिनाङ्क :-02.09.2025

प्रात: - 06:55

प्रधानमन्त्री  सेमिकन् इण्डिया -

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्याः यशोभूमौ सेमिकान् इण्डिया- पञ्चविंशत्यधिक द्विसहस्रेत्यस्य उद्घाटनं करिष्यति। त्रिदिवसीयं सम्मेलनं देशे दृढं, सुस्थिरं च सेमिकण्डक्टर्-इकोसिस्टम् इत्यस्य प्रगतिविषये केन्द्रितं भविष्यति। प्रधानमन्त्री श्वः अपि अस्मिन् सम्मेलने भागं ग्रहीष्यति, यत्र सः सि.ई.ओ. इत्येतेषां वर्तुलोत्पीठिकासम्मेलने भागं ग्रहीष्यति। अस्मिन् सम्मेलने अष्टचत्वारिंशत् तः अधिकदेशानाम् सार्द्धद्विसहस्रतोप्यधिकैः प्रतिनिधिभिः सह विंशतिसहस्रतोप्यधिकाः जनाः भागं ग्रहीष्यन्ति।

प्रधानमन्त्रीः राज्यजीविका निधि

प्रधानमन्त्री नरेन्द्रमोदी अद्य वीडियो कान्फ्रेन्सिंग-इत्यनेन माध्यमेन बिहार-राज्य-जीविका-निधि-सहकारी-सङ्घ-लिमिटेड् इत्यस्या: संस्थायाः शुभारम्भः करिष्यति। अनेन उपक्रमेण ग्रामीणमहिलासु उद्यमशीलता-विकासः सुदृढः भविष्यति, समुदायाधारित उद्यमानां विकासे तीव्रतापि आयाति। अस्मिन् अवसरे प्रधानमन्त्री संस्थायाः बैंक-लेखायां पञ्चाधिकैकशतकोटि रूप्यकाणि अपि प्रेषयिष्यति।

प्रधानमन्त्री – एस.सी.ओ. शिखरसम्मेलनम्

प्रधानमन्त्री श्रीनरेन्द्र मोदी  प्रावोचत् यत् आतंकवाद-विषये मानदण्ड-द्वयम् अस्वीकार्यमस्ति। चीनस्य थियानचिन-नगरे आयोजिते एस.सी.ओ. इति शंघाई-सहयोग-संघटनस्य शिखर-सम्मेलने निजे वक्तव्ये प्रधानमन्त्री मोदी  आतंकवाद: मानवतायै एकं बृहत् समाह्वानम् अस्ति इति

प्रत्यपादयत्। असौ प्रोक्तवान् यत् आतंकवादस्य सर्वाणि अपि रूपाणि निन्दनीयानि सन्ति। श्रीमोदी न्यगादीत् यत् भारतं विगतेभ्य: चतुर्भ्यः दशकेभ्यः आतंकवादस्य समस्यां सम्मुखीकुरुते। अत्रावसरे अमुना पहलगाम आतंक्याक्रमणस्य अनन्तरं भारतेन साकं ऐक्यबद्धता-प्रकटन-परेभ्य: सर्वेभ्य: देशेभ्य: आभारभार: अपि व्यक्तीकृतः।

असौ अग्रे अवदत् यत् भारतस्य दृष्टि: नीतिश्च त्रिषु प्रमुख-स्तम्भेषु – सुरक्षा, सम्पर्क: अवसरश्चेत्येतेषु आधारिता अस्ति।

एयर इण्डिया

नागरिक-विमानन-महानिदेशालयेन प्रथमवारं एयर इण्डिया एस ए.टी.एस. एयरपोर्ट सर्विसेज प्राइवेट् लिमिटेड् इत्यस्मै सुरक्षा-स्वीकृतिः प्रदत्ता। एतेन सह भारतं एशिया-प्रशान्तक्षेत्रे मलेशिया-देशस्यानन्तरं द्वितीयः देशः अभवत् यः आई.सी.ए.ओ.- दिङ्गनिर्देशानुरूपं एतादृशं व्यापकं रूपरेखां कार्यान्वितवान् ।

प्रधानमन्त्री-पञ्जाब

प्रधानमन्त्री नरेन्द्रमोदी पञ्जाबस्य मुख्यमन्त्रिणा भगवन्तमानेन सह ह्यः दूरभाषेण भाषितवान्। पञ्जाबराज्ये वर्षया जलप्रलयेन उत्पद्यमानायां परिस्थित्यां तौ चर्चितवन्तौ। सर्वकारीयसूत्रानुसारं चीनदेशात् दिल्ल्यागमनानन्तरं तत्क्षणमेव श्रीमोदी पञ्जाबस्य मुख्यमन्त्रिणं राज्याय सर्वविध साहाय्यं समर्थनं च आश्वासितवान्।

अफगानिस्तान-भूकम्पः

कुनार्-प्रान्ते भूकम्पानन्तरं भारतं अफ्गानिस्तान्-देशं प्रति पञ्चदश टनमितं मानवीयसहायं प्रेषितवत्। विदेशमन्त्री डा. एस्. जयशङ्करः अफ्गानिस्तान्-देशस्य विदेशमन्त्री मौलवी अमीर् खान् मुत्तकी इत्यनेन सह वार्तालापं कृत्वा अफ्गानिस्तान्-देशे मृतान् प्रति शोकं

प्रकटितवान्। एकस्मिन् सोशल मीडिया सन्देशे मन्त्रिणा उल्लिखितं यत् अद्य भारतात् अन्याः साहाय्योद्धार-सामग्र्यः प्रेषिताः भविष्यन्ति इति। अवधेयं यत् अफगानिस्तानस्य कुनार-प्रान्ते ह्यः समागते षट्-तीव्रतायुते भूकम्पे न्यूनान् न्यूनं द्वादशोत्तरअष्टशतं जनाः पञ्चतां प्राप्ताः सन्ति। तत्रैव प्रायः अष्टशतोत्तर-द्वि-सहस्र-मिताः जनाः व्रणिताः सन्ति । अफगान-प्रशासनेन एतत् पुष्टीकृतम् अस्ति।

हॉकी

हॉकी-प्रतिस्पर्धायां भारतेन गतसायंकाले बिहारराज्यस्य राजगीर-नगरे पुरुष-एशिया-कप-प्रतियोगितायाः पूल-ए इत्यस्य अन्तिमायां स्पर्धायां कज़ाकिस्तान-दलं पञ्चदश- शून्यं इत्यङ्कान्तरालेन पराजितम्।